श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ नक्षत्रमालास्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नक्षत्रमालास्तबकः ॥

आनन्दमैन्दिराः कुर्युरपाङ्गा यत्प्रसङ्गतः।
अश्विनीहस्तिसंपन्ना सम्पदुज्जृम्भते नृणाम्॥ १ ॥

भगवति सुधाब्धिकन्ये
भवतीं भूष्णुः प्रपद्येऽहम्।
परमाभरणीभूतां
भुजान्तरे भोगिशैलेन्दोः॥ २ ॥

निजशिरसि निदधदुच्चैः
सम्पन्मय्यास्तवाम्ब सोदर्यम्।
अपि सकलविभवदायी हा
वस्त्रीभूतकृत्तिको भिक्षुः॥ ३ ॥

तामसह्यभवतापशान्तये
स्तौमि तामरसवासिनीमहम्।
वर्णयन्ति यदपाङ्गमालिकां
वासुदेवनिलयाधिरोहिणीम्॥ ४ ॥

तव सुधांशुजयाभिमुखं मुखं
मृगशिरोमणिदर्पमुषौ दृशौ।
विघटकं च वपुस्तटिदुन्नतेः
भुवनमातरतो न तवोपमा॥ ५ ॥

वरुणालयेन्द्रतनये वरुणार्द्राः
तव लोकमातुरवलोकविशेषाः।
परितन्यमानदुरितं सततं माम्
अधुना पुनन्तु मधुनाशनकान्ते॥ ६ ॥

www.prapatti.com

शापेन रोषणमुनेः शमितप्रभावः
    देवोत्तमो मधुजितो दयिते विषण्णः।
तन्वंस्तव स्तववचः स्तबकैः सपर्यां
    स्थाने विराजति पुनर्वसुरुद्रसेव्ये॥ ७ ॥

निगमकथितमायुर्निस्तुलारोग्यभाग्यं
    निरवधिकविभूतिं नित्यहृद्यां च विद्याम्।
भगवति गुणपूर्तिं भासमानां च कीर्तिं
    बलिरिपुपदभक्तिं भेजुषां पुष्यसि त्वम्॥ ८ ॥

शेषाचलाधीशाङ्काश्लेषाचला मोदोन्नतिः
    सैषा भवोन्मेषाब्धि संशोषावहा विश्वप्रसूः।
तोषाय नः कल्पेत दुर्दोषापहा यस्याः पदं
    भाषाशचीमुख्यद्युसद्योषा शिरोभूषायते॥ ९ ॥

इहोपास्ते यस्ते चरणकमलद्वन्द्वममलं
    स पूज्यः स्वाराज्यं जननि कलयिष्यन्नविकलम्।
मघोनः साम्राज्यं मदनमथनस्यापि विभवं
    तृणप्रायं प्रायो गणयति पदं द्रौहिणमपि॥ १० ॥

आर्यसेवितमक्षयं फलमिष्टमार्यमतारकं
    यत्क्षणेन निजेक्षणेन मुदा ददाति सनातनम्।
तत् तटित्समधाम मङ्गलनाम तामरसालयं
    पालयत्विममानमत्सुरयौवतं परदैवतम्॥ ११ ॥

एकेनाञ्जलिनैव कञ्जनिलये सर्वार्थमुर्वीतले
    सन्दायाथ मुकुन्दमन्दिरगतिं संतन्वतीं त्वां विना।
मा रंस्तातिचले खले नृपकुले वागुत्तरा फल्गुनी-
    त्याशासेऽहमहर्निशं तदितरद्याचामि नो जातुचित्॥ १२ ॥

क्षिपतु क्षिप्रमनल्पमप्रतिहतस्तापत्रयं मामकं
    भवदावाग्निभयावहस्तव कृपावीक्षासुधानिर्झरः।



www.prapatti.com

व्यधयन् साधुकदम्बमम्ब विहितप्रौढागमव्याहतिः
शशिनः सोदरि हानिदाघविभवः शान्तिं यतो विन्दति॥ १३ ॥

लोके पाकारिमेके विरचितयजनश्रेणयः प्रीणयन्ते
केचित् त्रासापनुत्त्यै विदधति नृहरेर्योगिवर्याः सपर्याम्।
अन्ये पाथोधिकन्ये हरपरिचरणं कुर्वते सर्वदेह
त्वामेवामेयरूपां मनसि वयममी सर्वदा भावयामः॥ १४ ॥

मयि सर्वापकृतिक्षमेऽपि कलय स्वातीव शीतां दयां
हरिकान्ते भुवनोपकारनिरतेष्वन्येषु धन्येष्विव।
पनसाम्रादिमहीरुहेषु ददती भूरीणि वारीणि सा
विषवृक्षेऽपि मुहुः प्रवर्षति न किं विश्वाम्ब कादम्बिनी॥ १५ ॥

पूर्णं वर्णयितुं तवाम्ब निगमा न प्राभवन् प्राभवं
यस्याः स्वर्गणिका मुदं विदधते दास्येन लास्येन च।
वाणी सा च विशाखदन्तिमुखयोर्माताऽपि जातादरे
धन्ये चामरवीजनं रचयते धत्ते कलाचीं शची॥ १६ ॥

बहुतरमनूराधारयता मुखैरखिलश्रुतीः
नळिनजनुषा निर्मातुमहो यदम्ब न शक्यते।
कथमिह तव स्तोत्रे कवयः स्वयं वयमिन्दिरे
जगति शिशवोऽशक्यार्थकृतोऽथ वा जननीमुदे॥ १७ ॥

त्रस्यत्ताताभिहितवचनत्राणधर्माय सीते
ज्येष्ठैकार्हं रघुपरिबृढे राज्यमुत्सृज्य याते।
विश्वं त्रातुं त्वमनुचलिता वीरमेनं हि नो चेत्
कस्माद्भस्मीभवतु जगतां कण्टकः पङ्क्तिकण्ठः॥ १८ ॥

द्विषच्चमूलयेच्छया तवाङ्घ्रिपद्ममिन्दिरे
स्फुरत्सरोजमन्दिरे सुराः पुरा ववन्दिरे।
तदेव संपदे वयं निरापदे तमोभिदे
भजामहे भुजायुगीयुजा नतेन मौलिना॥ १९ ॥

कलितनियमपूर्वाषाढकाषायचेला
    यतसकलहृषीका यद्यतीन्द्रा विशन्ति।
तदपि भजति धाम न्यस्य भारं त्वदङ्घ्रौ
    मम जननि नृपाशो मादृशो बालिशोऽपि॥ २०॥

सारापदानशतमोदितविश्वदेव-
    तारापतिस्थमपि भानुसुतेन राज्यम्।
त्वत्प्राप्तिकार्यसहकारिगिरैव लब्धं
    कार्योद्यमोऽपि महतां कमले शिवाय॥ २१॥

दुरितं विषह्य निखिलं दयानिधे
    परिपात्वकिञ्चनजनं भवानिति।
जगदुद्भवादिनिरतस्य शार्ङ्गिणः
    श्रवणेऽभिधेहि रहसि स्वयं रमे॥ २२॥

अशक्तोऽस्मि दुःसाधनिष्ठासहस्रे-
    ष्वहं कर्मबोधाद्युपायान्तरेषु।
अतस्तावकीने सुरद्रोरनूने
    पदे लोकमातः प्रपद्येऽतिभीतः॥ २३॥

त्वत्परिग्रहजुषं द्विषन् रमे
    क्षीयते बहुसहायवानपि।
तन्निदर्शनमपास्तवारिजः
    चन्द्रमाः शतभिषङ्निषेवितः॥ २४॥

भगवति यस्य भवद्गुण-
    कीर्तनकं प्रोष्ठपदमास्यम्।
भवति हि जगति गतिस्त-
    च्चरणाम्बुजरेणुरस्माकम्॥ २५॥

त्वत्पदमरविन्दगृहे
    वन्दन्ते हन्त जन्तवो भुवि ये।

भुवनोत्तरभाद्रपद
    क्षुण्णममीषां गृहद्वारम्॥ २६ ॥

शिशिरेऽवतीर्य सिन्धौ
    साकं शीतांशुना पद्मे।
करुणार्द्रे कान्तहृदि
    स्थास्नुर्मुष्णासि तापं मे॥ २७ ॥

संग्रथ्य चित्रैः पदरत्नखण्डैः
    समर्पिता दास्यजुषा मयैषा।
नक्षत्रमाला नदराजकन्ये
    हृद्या त्वदीये हृदये चकास्तु॥ २८ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे नक्षत्रमालास्तबकः ॥

www.prapatti.com